प्रास्त्रदीपिकाव्याख्याप्रभा चतुर्थोध्यायः

४२२२

ग्रंथसंख्या संपूर्णा चै
१३३५५

शा. दी.
१

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथातः क्रत्वर्थ ॥ ॥ पूर्वाध्यायेन सहोपजीवकत्वसंगतिपूर्वकमेतदध्यायार्थमाह
प्रसिद्ध इति । प्रकर्षेणापकारप्रमाणादि वैशिष्ट्ये न सिद्धे निर्णीत इत्यर्थः । शेषशेषित्वे । अंगांगिभावे । प्रयुक्तिरिति । अ
नुष्ठानापरपर्यायः प्रयोगः किमर्थं तथा प्रयोगविधिना बोध्यत इति निरूप्यत इति निरूप्यत इत्यर्थः । शंकानिरासा
र्थत्वेनोत्तरार्धं व्याचष्टे । यद्यपीति । पुरोडाशकपालेन तुषानुपवपतीति शेषशेषित्वसत्वेपि पुरोडाशप्रयुक्तस्यैव क
पालस्य ग्रहणात् तुषोपवापस्य प्रयोजकत्वाभावेनाव्यभिचाराद्धेतुत्वानुपपत्तिरिति शंकार्थः । कारणसत्वेपि हेत्व
न्तराभावे कार्यानुदयान्न व्यभिचारस्य कारणत्वाविरोधित्वाद्व्यतिरेकव्यभिचारस्य च तद्विरोधिनोऽसत्वान्न हेतु
त्वानुपपत्तिरिति समाधानार्थः । न च निमित्तस्याशेषित्वेपि नैमित्तिकप्रयोजकत्वाद्व्यतिरेकव्यभिचार इति वाच्यं । स्वा
र्थतया प्रयोजकत्वस्यैतदध्यायार्थत्वात्तस्य च शेषित्वे एव सत्वात् । निमित्ते तूपकारार्थं प्रयोजकत्वं न त्वार्थमिति भेदात् । न
नु दध्यानयनादिविधेरेव दध्यानयनाद्यनुष्ठापकतया प्रयोजको न त्वामिक्षादीति दध्यानयनमामिक्षाप्रयोजकप
त्ति किं वा वाजिनमपीति करिष्यमाणविचारानुपपत्तिरिति शंकते । नन्विति । अंगविधेरप्रयोजकत्वमाशंक्याह । सर्व
स्यैवेति । कृतत्वश्रुत्याह । अप्रयोजकस्येति । अननुष्ठापकस्येत्यर्थः । कुतस्त्वत्राह । नदेवेति । प्रवर्तनारूपस्य विधेः प्रवृत्तिप्र राम
योजकत्वभावत्वादित्यर्थः । ननु प्रधानविधेरेवस्यांगप्रधानानुष्ठापकत्वात्प्रयोजकत्वं अंगविधिस्तु मन्त्रविनियो १

गपरस्य वसनक ननु प्रधानविधेरेव सांगप्रधानानुष्ठापकत्वात्प्रयोजकत्वं अंगविधिर्नर्थक्यं तांशेनामपि भावादनुवाद
कएव · तथा च दध्यानयनं प्रधानमन्त्रामिक्षाविधिप्रयुक्तं न तु वाजिनविधिप्रयुक्तमिति विचारोपपत्तिरिति शंकते · अथेति ·
अन्यतः · प्रधानविधेः · दूषयति · नन्वमिति · इदमप्रयोजकत्वं · आमिक्षाविधेः · विशिष्टविध्यन्यथानुपपत्त्याकल्प्यस्या
मिक्षारूपविशेषणांशविधेः · पृथक्त्वे आमिक्षावाक्यस्य प्रधानविधित्वादसंगतेः · विधिरेवेति · प्रधानविधिः सर्वोपि विधिरि
त्यर्थः · एवमिति · कपालविधिः किं पुरोडाशार्थं तपाकपालमनुष्ठापयति उत तुषोपवापार्थं तपायतीति संशये इत्यर्थः · आदिमे कल्पे आ
दिपरिग्रहः · एवमप्यामिक्षादौ कथं प्रयोजकत्वव्यवहार इत्यत आह · पदार्थं चेति · तथा च प्रयोजकशब्दः प्रयोजनविशेषपर इति भा
वः · ननु पुरोडाशकपाले न तुषानुपवपतीति विधि तुषोपवापार्थं तपाकपाले न प्रयोजयतीत्येतदनुपपन्नं · तस्य स्वविषयानु
ष्ठापकत्वस्वभावस्य किंचिदंशे न तु ष्ठापकत्वं किंचिदंशेनेति वक्तुमशक्यत्वादत आह · पदेति · पदग्रहणस्य · पदं यो स ग्रहणस्य ·
पदं कस्येत्यपेक्षायां सन्निहितैककपालवती विशेषणत्वेनांगीक्रियत इत्यर्थः · प्रवृत्तिशक्तिः प्रयोगे तात्पर्यं युज्यते · नास्ति तदा घ
वातत्र न तन्त्रत्वस्यैव शब्दतात्पर्यविषयत्वादिति भावः · स्वतन्त्रेति · अनन्यप्रयुक्तेत्यर्थः · ननुक्तत्वर्थत्वादिति वा रस्याप्य
त्रदर्शनात्कथं प्रवृत्तिरप्यापार्थ इत्यत आह · सर्वस्मिंश्चेति · तदुक्तं · फलविध्यर्थत्वात्काम्यार्थांगप्रधानता · फलक्र
तु प्रयुक्तत्वविचारापविचारिता इति ॥ विचारप्रदर्शनात्प्रयोजनमाह · तदेतदिति · सूत्रार्थस्त्वक्तं · अथ शेषलक्षणा

शा.दी.
२
2

नंतरं अतः उपजीवकत्वसंगतिवशात् क्रत्वर्थपुरुषार्थयोरितरेतरप्रवृत्तिनिरूपणायाक्षिप्यत इति ।। शंकाव्याजेन
गुरुमतमुपन्यस्यति । यस्तु नरः इति । श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानैः शेषविनियोगलक्षणमुक्त्वापि
ति भाष्यं तत्र प्रोक्षणादि कर्म्म ते न प्रोक्षणादि प्रमाणकमुक्तं अन्यप्रमाणकं तो क्रमेति गम्यते । तस्मान्यत्तु प्रमा
णमुपादातव्यं च तुर्थे कथ्यते । उपादानं नाम कार्यान्विताभिधानप्रवृत्त्याक्षेपः । तथाहि व्रीहीन् प्रोक्षतीति कार्यान्वितप्रो
क्षणावगतौ प्रोक्षणस्य करणत्वेन कार्येन्वयस्य यागकरणकेऽसंभवात् करणांगता द्वारा तत्पर्यवसानकल्पनमिति सौपादानिकं
प्रोक्षणस्य यागांगत्वं । प्रोक्षणादिकं तु व्रीह्यादिद्वारशेषतापं यागांगत्वं सोवयवादिकापां प्रमाणमिति । प्रतिबंधात वदुपन्यस्यति । अर्थे
ति । तत्र । नानाकर्मेतिकर्तव्यतापादि ग्रंथे । प्रोक्षणादेर्यागांगत्वं तु प्रकरणागम्यमेवेति नातिरिक्तप्रमाणकल्पनापुक्त साशयः ।। ।।
यस्मिन् प्रीतिः ।। ।। सूत्रस्य प्रवृत्तोपयोगिताम् आह । वक्ष्यमाणाधिकरणेति । सामान्यतो ज्ञाने हि यं क्रत्वर्थोऽयं पुरुषार्थ इति निरूपि
णमतो लक्षणसूत्रमिदमिति अर्थः । तत्र पुरुषार्थलक्षणामुक्त्वा क्रत्वर्थलक्षणं वर्णादिति तेषं । प्रथमसूत्रगतक्रमानुरोधाद्
दौ क्रत्वर्थलक्षणपति । यदिति । भावनायाः कथंभाव इति कर्तव्यताकांक्षातस्मात् करार्थः । सिद्धरूपद्रव्यकालादेरपि प्रयोग
विध्यवगतोपादानप्रकृपक्षे पयप्रतीक्षणादि पुरुषव्यापारविषयत्वेनिक र्तव्यताभवति द्रुमः । एवं निषेधानामपि त्वाविना टप
भूतसंकल्परूपपुरुषव्यापारविषयत्वात्तथात्वं । अतएवाप्राशस्त्यज्ञानस्य तत्रेति कर्तव्यतासोपपन्नेति न काप्य २

व्याप्तिः॥ अन्यथादिति। एतस्मात्स्वरूपकीर्तनप्रयोजनं फलतत्करणतान्यतरस्य मात्रं लक्षणं॥ अन्यथा स्वादिरस्वादेरन्नपार्थे तेन
कस्यचिदभित्रस्याभावाव्याप्तेः फलं स्वर्गशास्त्राज्ञानधीनेच्छाविषयं स्वर्गपश्वादिषु। अन्यथेति। तानपोषकशास्त्राधीनेच्छाविष
यस्वात्रकफलत्वमिति नाद्यानाध्यापनप्रेरति व्याप्तिः कलिञ्जभक्षणादिनिषेधानामपि पुरुषनायपरिहाररूपफलकरणता
त्वात्पुरुषार्थत्वोपपत्तिः सूत्रमपि पश्चिन्यपागादौ सति पुरुषस्य प्रीतिः स्वर्गादिरूपा जायते तद्भवमपि पुरुषार्थ इति शेषः
कृतकस्य लिप्सार्थत्वाच्छार्थत्वं दृशता शास्त्राज्ञानधीने समर्थः नतु साधनेच्छाधीनैवेति कथं तस्य पुरुषार्थत्वमत आह। अ
विभक्तत्वादिति। फलाविनाभूतत्वात्तस्य पुरुषार्थत्वे तात्पर्यः इति व्याख्येयं अविनाभूतत्वं तत्करणत्वमपि फलार्थत्वात् मः
॥ ॥ विचारशास्त्रे तत्परत्वस्यैवौचित्यादाह। अथवेति। तद्विषयप्रवृत्तिप्रयोजकस्यैव तद्विशिष्टफलस्य च प्रवृत्तिरूप
भावनाविशेषणतात्वेन विषयत्वमाह। विधेयेति। विशिष्टभावनाविषयविधिनाविधेयत्वेऽप्राप्तत्वविधिकल्पनं। फले
तु रागतः एव प्रवृत्तेर्न तद्देशे विधिकल्पनेत्याह। रागतस्त्विति। पूर्वपक्षे श्येनफलस्यापि हिंसारूपाभिचारस्य विधेयत्वापात्त
हिंस्यादिति निषेधाविषयत्वं। सिद्धान्ते तु तद्विषयत्वमिति प्रयोजनं॥ ॥ प्रयोजकाप्रयोजकविचारस्याग्नेकदिष्य मारा
त्वानद्वपयोगितया प्रवृत्तितः कथं पुरुषार्थविचारस्य वक्तुमुचितइत्याशयेन वर्णान्तरमाह। अथवेति। दुष्टु
तेस्मिन्नतद्दोहनेनपात्रं अत्रापि पूर्वपक्षस्यातिमंदत्वादाह। एवं वेति। केचित्तु व्याजेनोपायानियमस्योदाहरणतो

शा॰ दी॰
३

नाभाष्येतु इहद्रव्यार्जनमुदाहरणमित्युक्तमतः किमितिप्रश्नः भाष्योक्तमेवेत्याह द्रव्येति द्रव्यमर्जितेनेनेतिव्युत्पत्ति
धर्मनिरासायाह द्रव्यस्येति कीदृशीकविहितेत्याकांक्षायामाह येपरिमिति दयादिनेतीप्स्यनंतरस्मृतिविहितेतिशेषः अत्रा
द्येनादिपदेनयाजनाध्यापनसंग्रहः द्वितीयेनदंडादेः तृतीयेनवाणिज्यादेः चतुर्थेनशिल्पादेः दायः पित्रादिधनं तदंगमिति
द्रव्यार्जनांगमित्यर्थः तादर्थ्ये सतीति अर्जनस्य तादर्थ्ये सति पुरुषार्थत्वे सति नियमस्तदंगं द्रव्यार्जनांगं नस्यादित्यन्वयः
ननु पुरुषेशास्त्रकार्यार्थमर्जनेनक्रियमाणेक्रतरपि स्वकार्यं तादर्थ्यमपि क्रियत इति क्रत्वर्थद्रव्यार्जनांगत्वेनाप
नियमः स्यादर्थकृः स्यादिति शंकते नचेति विशेषः शास्त्रावगतो वा न तद्भावे पित्रीहीनप्रोक्षतीति न स्वकरणावगतो वाना
त्नीमाह विशेषेति त्वं धनं एवं चेति सर्वद्रव्यस्य क्रत्वर्थत्वे चेत्यर्थः क्रत्वर्थमिभावप्रधानं क्रत्वर्थत्वे जैकांतो नियमो
यस्यतादृशोऽर्थः यस्याहिताग्नेरग्निर्गृहान्दहेदग्नयेक्षामवते पुरोडाशमष्टाकपालं निर्वपेदितामेवनिर्वपेद्यस्य हि
रण्यं नश्येदित्यक्षामवतीष्टिः आदिनायस्यहिरण्यं नश्येदाग्नेयादीनिनिर्वपेदिमाग्नेकादीष्टिः संग्रहः त्वादिरवनं पुरुष
त्वादिरस्तु वै भवतिसक्ष्वदसामेवरसेनावघतीतिविहितत्वादिरव वनं तस्यापि क्रत्वविनाभूतत्वसंबंधेनक्रत्वर्थत्वा
त क्रत्वर्थमाच क्रत्वंगद्रव्यनाशकृतवैगुण्यपरिहारात क्षामवत्यादेर्व्याख्या द्रव्यस्य पुरुषार्थत्वे तन्नाशेक्रतुवैगु राम
ण्याभावात्स्वतंत्रफलकल्पनागौरवमितिभावः सर्वद्रव्यस्य पुरुषार्थत्वेऽस्मिन्निरूपणे निगदर्शनमप्याह तथाचेति ३

एवं चन्यायोपपद्यते तस्मादिति वशात् तपस्यां तु कर्मणा यस्य श्रीरिति कर्मणि शानच् विकेनादिस्मृतिः कृतु नैव स्वसिद्ध्यर्थं त
वन मात्रे विनियोगानुमतेस्तदनुवादमात्रमिति भावः अनुमानेनेति नियमान्यथानुपपत्तिरूपार्थापत्त्येमर्थः अनुपश्च
मानमिति व्युत्पत्तेः अविधेयत्वादपि न कृत्वंगत्वमित्याह रागेति नन्वकृत्वन्यथानुपपत्त्याक्रत्वर्थे नापितीवनंस्यादतो दो
षांतरमाह द्वयेति अपवादस्य अपसुवर्णान्नोका क्वचिद्धतपोदर्शपूर्णमासयोजीमन्त्रमावास्यावा पूर्णमासी वा तिपातये दिमन्त्र
तिपातनमनुपक्रमइत्याशयः एवं पुरुषार्थत्वे दृष्टार्थं दृष्टमात्रार्थे क्रत्वंगत्वेन दृष्टद्वारा तदपूर्वार्थत्वमापाति भावः तद्दंग
पदर्थाक्रिया तदर्थोनियमोपीत्यर्थः अध्यायाध्याय भाष्यानुसारि तत्र इत्यार्तनस्यैवोदाहरणमातः तद्दूपन्यासः अत एव मा
दे क्रत्वर्थत्वोपन्यासः प्रयोजनं पूर्वपक्षे पूतिद्ग्राघाणे तस्यैव क्रत्वनुपयोगः सिद्धांते नेति ॥ ॥ तद्वसर्गे ॥ ॥ प्रोक्षविभाग
इत्यार्तनस्यात्वपुरुषार्थतानदभावेतुप्रजापतिव्रतानां क्रत्वर्थताश्वितिप्रसवद्भ्रा नास्तिगतिः यं पुरुषस्त्वेपि क्रत्वर्थत्व पू
र्वपक्षत्वनादर्त्नव्यइति सूचयितुमाह तथेति श्रुतिः शाब्द इति नातावेकवचनं नत्रोक्षता वाचकौ भवत इत्यर्थः क्रि
यांतरं अनीक्षणास्तंकल्परूपं तावताकथं क्रत्वर्थताऽत आह सचेति प्रतिषेधइत्यर्थः ननु क्वचिद्धितप्रतिषेधे विकल्पापत्ति
रिमा शंक्याह उद्यत इति यद्यादित्यमीक्षेत न च श्रौतमिप्रत्यव्यदेवत्यानिषिध्यते न तु विहितमीक्षणं तायेन विकल्पः स्यादि
ति भावः भांष्ययोफलं तत्रावता हैनसाऽपुरुषोभवतीत्यर्थवादिकपापक्षयरूपं क्रतुमत्क्रत्वपकारेणानिराकांक्षता

दितिभावः॥ भाष्योक्तपक्षांतरमप्याह॥ अथापीति॥ उपक्रमइति॥ अतस्तदन्वयपदनादिमन्वयः॥ क्रतोः॥ क्रतुप्रकरणा
तद्बहिः॥ क्रतइत्यन्वयः॥ क्रतुसंबंधेक्रत्वंगत्वेक्रत्वादिप्रमाणांतदत्रनविघतइत्यर्थः॥ तस्यपर्युदासस्यतत्त्वभ्या
नीभूतासंकल्पस्यसाक्षात्पुरुषापेक्षितार्थत्वंप्रतोविधिनाबोधितंअतः फलमेवापेक्षितंनक्रतुरितिप्रोक्तम्॥ तत्र॥ फल
च॥ प्रयोजनंपूर्वपक्षेक्रतुधर्मत्वेनिषेधपालननामिष्ठानेसर्वदा॥ संकल्पाधिक्यंचेति॥ तदुत्सर्गेपीत्यनुपलभेपिकर्म
ति प्रजापतिव्रतादीनिपुरुषार्थानिपक्ष॥ लाप॥ शास्त्रस्यानतिशंक्यत्वान्निर्विचिकित्सप्रमाणात्॥ त्वात॥ क्रत्वर्थतानकुतस्तत्रा
हनचक्रत्वंगइत्यंचिकीर्ष्यतेसंहितोपते॥ तेनअर्थेनप्रलेनाभिसंबंधाद्यर्थवादेसंबंधाकिंपापापुरुषस्याभाव्यनपापकृति॥
पुरुषार्थत्वमितिसूत्रार्थः॥ ॥इत्यादितनु॥ ॥प्रजापतिव्रतानांक्रत्वंगत्वेयथाप्रमाणाभावस्तथास्यादीनामपिसाक्षा
तक्रत्वंगत्वइत्यादिदेशिकीसंगतिः॥ नतीयेसर्वमुद्धननादिसर्वैः कार्यमुतयथासंयोगंव्यवस्थेतिचिंतितं॥ इहतुप्रदेयव
मारांक्ष्यनिराक्रियतइत्यनंतार्थत्वं॥ नचपतापुधवाक्येसमरणाविध्यर्थवादवस्थोक्तवादिहपूर्वपक्षासंभवइतिवाच्यं॥ प
पतापुधानितिसमरंतीतिविधेयंतापुधत्वंविनानप्रपत्यापतापुधवाक्यस्यापिप्रत्यविधित्वस्यावश्यकत्वमिममर्थवादत्वान्वे
पेतापूर्वपक्षोपपत्तेः॥ उपांशुयाजेविधानेनोप्रवृत्तिशिष्टयुताविरोधस्याप्यभावाच्चेतितेपि॥ वादमात्रं॥ अनुवादमात्रं॥ प्रपाना
दिव्यावर्त्तनापाठः॥ पत्तशब्दइति॥ नन्पतोद्देशेनसाधनविधावेकप्रत्ययगइमाशंक्याहतत्साधनतयेति॥ एतान्नाम

न्त्र्यपत्नसाधनानि कर्तव्यानीति पत्नसाधनत्वेन रूपेणाविधानमपि समर्थः इदं चापाततोपत्नापुषवाक्यानर्थक्यपरिजिहीर्ष
यो च्यते· वस्तुतः कैमुत्यन्यायेनोपांशुयाजे विधानमेव तेषं· नहीति· अत्र पत्नापुषवाक्ये· वैषम्यात्· उपमसुमन्त्रशिष्टस्य रू
पात्· नच्चनुवादानर्थक्यासर्वमंगीकार्यमत आह· पत्नेति· संभरतात्मावकतपादैकवाक्यताप्रतीतेरानर्थक्याभावादुद्
ननादिसाधनतयाचपत्नापुषलोपपत्तेः सर्वस्यैवास्तन्तदिसाधनत्वार्थवाक्यविहितास्य स्यान्यार्थेनानेन वाधायोगादितिभ
वः· सूत्रप्रयोजनेस्पष्टे॥ ॥तत्रैकवं॥ ॥ एकश्रोद्धननार्थस्यस्यापादैर्वाक्यादपत्तांगत्ववदेकत्वस्यापिपदश्रुत्यापश्वन्वित
स्य नकास्यापत्तांगत्वेति प्रत्यवस्थानसंगतिः तत्रेति· पश्वंगता· पशुविशेषकता ना· प्रधान्यकर्तेंगत्वस्य विध्यक्षीनत्यापावि
धेश्वापूर्वसाधनत्वलक्षणतांविनानुपपन्ना अविवक्षानुपपत्तेः अतएवापत्तांगमिमेवपूर्वपक्षकोटिः सूत्रेस्वयंचोक्ते
ति· तस्याः संख्यायाः तदभावेच· अपत्तांगाभावे वत्तत· अपत्तांगं· प्रमपस्त्ये नप्रमपाभिहितेन· आमसापकता· स्वान्वि
तत्वेनावगता· अर्थात्· योग्यताहूपलिंगात्· तादर्थ्यं तु· अंगत्वं तु· पशोर्द्धारत्वमात्रं· आहत्याप्रतीतैकत्वापन्त्याइत्यर्थः· न
चैवंग्रहैकत्वस्यापिविवक्षापत्तिः· तत्रग्रहैकत्वयोरुद्देशेन संमार्गभावनाविधौ वाक्यभेदापत्तेः इहतु तदभावेन विवक्षो
पपत्तेः नचैवंसप्तिपदिसोमप्रमपाहरेपुरेकागांदक्षिणांददातीत्यत्रैकपदवैयर्थ्यं· दक्षिणात्वानुवादेनैकत्वगोत्वादिविशिष्ट
कारकस्य धेनुद्दिशोतितद्विधानेऽश्वादिनिवृत्तिप्रसंगात्तद्वारागपशोरुद्देशेनैकत्वमात्रविधयर्थंतदुपादानादिति

शा॰ दी॰ 4

5

॥तथा च निगमिति सूत्रस्याधिकरणांतरमेभाष्यानुसारेणा(हएवंवेति॥ ॥शब्दप्रयोगादिति॰ सुप्प्रातिपदिकरा
वादिप्रयोगादित्यर्थः॰ अशब्दार्थः॰ व्यभिचाराद्धेतोः शब्दानभिधेयं॰ शब्दस्येति॰ सुब्विकारजोपादेरित्यर्थः॰ तथा च क्वचित्
बाध्यादनन्वये पिसाधुत्वमात्रार्थत्वमिति भावः॥ ॥आश्वयिषु॥ ॥अत्र पूर्वोक्तप्रकारकांगत्वस्यापवादासंगतिः॰
उत्तमोत्तिमः स्वाहाकाराख्यः॰ आश्वयिशब्दार्थमाह॰ अंशेनेति॰ दैवतोद्देशान द्रव्यभागरूपस्य हि यागस्योद्देशभागरूपं
शब्दरूपं॰ प्रक्षेपस्यांशत्वव्यवहारश्च यागशरीरनंतर्भावे॰ पितसमकालिकत्वयोपचारिकः होमे तु तस्यांशत्वमुख्यमेव॰ त
त्र स्वाहाकारपुरोडाशो मन्त्रसाधनके नोद्देशांशो नाग्नेयादिदेवस्य प्रक्षेपांशेन प्रतिपत्तिरूपसंस्कारजनके॰ उद्देशांशेन च मं
त्रांगकेन इन्द्रदेवतासंस्कारकश्चार्थः तदर्थावेव॰ इन्द्रदेवतासंस्कारार्थावेव॰ एकस्येति॰ यागस्य हि विधानात् प्रयोजनाकांक्षान
त्वंशानांप्रथमिति भावः॰ किंचिदंशानर्थक्येन दधि इतावव विविधे प्रयोगाद्देशानामपि प्रयोजनमाव एककमित्याह॰ उच्यमेति॰
प्रयोजनं पूर्वपक्षे स्वाहाकारेऽपूर्वप्रयुक्ताभिक्रमणाननुष्ठानं सिद्धान्ते त्वनुष्ठानं॰ यस्तु पुरोडाशो चैकभक्षणमनतिदेशा
त्तिदेशो॰ स्विष्टकृति शेषनाशे लोपः॰ सिद्धांते नाशेन समाप्तं॰ यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येनै
ना देवताः परिसंख्याय यजेतेति वचनात्॰ आश्वयिंशेन द्रव्यदेवतासंस्कारकेषु प्रयाजादिभ्यो विशेषाभावे भावो भा
व्योऽर्थः अपूर्वप्रतीयते तिसूत्रार्थः॥ ॥अर्थे॥ ॥एतदेव॰ प्रयोजकाप्रयोजकत्वमेव॥ ॥एकनिष्पन्ने॥ ॥ राम 4

उभयार्थमिममन्तरं दध्यानयनमिश्रमनुषंगः । आमिक्षायाः प्रयोजनं त्वसाधनस्य प्रकृतोपयोगमाह । अत इति
आमिक्षया असंपृक्तमिश्रणयः । तद्वा स्येतित्वक्यादेन । मन्त्रेति । नुखं तां प्रयपइति वक्ष्यमाणादिसधः । नचामि
क्षायाः द्रव्यमेनपूर्वपक्षानद्दिवा द्रव्येष्ठप्रथमं तच्चकार्यं प्रवृत्ते नसिद्धातातं भः । कथमपि प्राशं क्यायाद्द्व्य
त्वदे । आस्त्रमिति । आमिक्षायदार्थं मिति यस्याः पृथपसिद्धा तात्रे तद्द्धिकरणाविषयत्वं । किं द्रव्यमदपरामर्शं दधि
पयो वाऽमिक्षायदार्थं इसेतावत इति । तमदार्थं प्रवृत्तेनातं भ इमा शयः । सच । तच्च दृश्यत्व । ननु दध्रस्व वकर्मतपाना
दर्थ्यमेवानयनस्य प्रकृतं पयस्त्वमिकरणात्वाग्रुणान्यतमि प्राशं कते । कथमिति । नचतां ग्राम्यं नयती मादावुभ
यत्वद्धितीयाश्रवणोपि विवक्षावशेन प्रथमस्याद्धितीयस्य वाऽनियमेन प्राधान्यादित्तुसम्प्रमीश्रवणोनसुतरांप
यः प्राधान्यासंभवइत्यत आह । तथा चेति । पुरोदधिपृक्तं पयोतिश्वेदेवानुबंतामिस्यर्थे कर्मत्वे देवताभागत्वेनपयः
प्रकाशनेनपयस्य व प्राधान्येनता सर्वविषयइत्येवममास समस्या अपि अग्गारेगावो वास्यं तामिति व प्राधान्य
वोध्यनार्थ्यम प्रदेतिभावः । अमि वेयः । आमिक्षेयनामितिमि ने । सूत्रार्थस्त । एकस्माद्दध्यापनादेर्निब्रतेः सर्वमा
मिक्षावाजिनादिसमं प्रयोजकं स्यादिति । प्रयोजनं पूर्वपक्षेवाजिननाशे तदर्थं दध्यानयनं । सिद्धान्ते तु न । किंता
से नसमापनमिति ॥ ॥पदकर्म ॥ ॥वदिति । रूपदेशं प्रतिनायमानायाः । बहुपदानिष्प्र धर्पुरन्तनिक्षामति

शा० दी० तत्त्वसदोपरित्वपदं इति दर्शयति तीसर्थः परिहिपत्रहविर्धानशाकटे प्राचीप्राग्मुखे प्रवर्त्तये पुनर्नये पुरस्ताद्धि तद्दाते न पदरजसा
६ अक्षशकटसंबंधिनः पूर्वं प्रादिसर्थः द्वयोः कपालयोः अधिश्रयणं तन्नयोः आदिक्षातौ वैषम्यमाह वाक्ये चेति। षष्ठपदान्वयन्
निः क्रमतीति न यजनवाक्ये अव्रतादिसर्थः एवं विधाशंकाविकल्पे न पूर्वपक्षो स्यान्नासंगतिरितिसूचितं। पदशेष
ता। पदपांसुग्रहत्वात् शेषता। न यजनवाक्ये कपाल अवतोपितदं गेकहापदी संस्कारतयैव तदंगत्वावगमात् अप्रयुक्त
ये वत्तयजनविधिमाह। यैतवमिति। पदकर्म। पदपांसुग्रहं सा यं तन्नेवा। परार्थमिति। कपार्थमित्यर्थः प्रकृतपतामर्शितत्वछन्दा
दपि परार्थत्वावगमो बोध्यः प्रयोजनं पूर्वपक्षे ग्राविसमयपदपाते पांसुवर्थं पुनर्नयनं सिद्धांते नेति। सूत्रं व्याख्या
तं॥ ॥ अर्थाभिधान॥ ॥ तुषोपवापः अवघातकालिकतुषनिर्गसनं। तत्रेति। कपालस्येसेतावन्मात्रो न्यान
पुरोडाशार्थकपाल ... नविनियोगेपेन पुरोडाशविनियोगसापेक्षता तुषोपवापे विनियोगस्य सप्रयोजकता तुषो
पवापस्य स्यात्। विनियुक्तविनियोगस्य नैराकांक्ष्येनाप्योगात् अनुष्ठाने प्रसंगः पुरोडाशार्थोपात्तस्येच कार्य
वा न्यायेन प्राप्तेः पुरोडाशसंबंधांशेनुवादमात्रत्वमिति सूचितं तत्तीयाध्ययानविनियोगात्वाधिकांशे कपालसं
गतिः तदंगत्वं। तुषोपवापांगत्वं। अप्रयोजक इत्यनंतरं तुषोपवाप इति शेषः। पुरोडाशस्य कपालमिति राम
षष्ठ्यर्थः। प्रयुक्तत्वमित्यर्थः एवं च विनियुक्तविनियोगविरोधः परिहृतः प्रयोजनं पूर्वपक्षे च रा ६

6

वपि कपाले नैव तुषोपवापः सिद्धांते तु हस्तादिनापीति। अर्थः प्रयोजनं तच्च रूपविधानं यस्य पुरोडाशकपालस्य त
त्कर्म तुषोपवापरूपं तद्द्रव्यप्रयोजकमिति चकारार्थः। कुतः भविष्यता पुरोडाशेन संयोगस्य तन्निमित्तत्वात्ते डाशप्रयु
क्तानि मित्तत्वात्तदर्थैरिति कपाले सति तुषोपवापस्तेन विधीयत इति सूत्रार्थः॥ ॥पशौ॥ ॥तुषनिरसनेन लोहितनिर
सनादिस्मरणात् संगतिः। संप्रविध्यति। प्रक्षिपति। शकृल्लोहितं चेति। शकृल्लोहितयोरनुपयोगान्निरसनस्यार्थकर्म
त्वाच्छकृल्लोहितप्रयोजकत्वं तयोश्च पशुप्रयोजकत्वमित्यर्थः। प्रतिपत्तीति। अनुपयोगे व्यनुनिष्पन्नस्याकार्यकर
स्य प्रतिपत्तिकार्यत्वं नावदिति भावः। प्रयोजनं पूर्वपक्षे लोहिताभावे पश्वंतरालंभः सिद्धांते तु निरसनलोप इति। सूत्रार्थ
स्तु पशुस्थत्वे लोहितशकृतोरकर्मत्वं प्रयोजकत्वं तदर्थत्वात्पशोरनालंभादिति॥ ॥एकदेश॥ ॥प्रतिपत्तिर्वापि
सामांशेनार्थकर्मत्वाद्दधिकाशंकेति संगतिः। अन्यद्भुतिरिति। न च शेषात्स्विष्टकृतेऽसमवद्यतीति शेषशब्दानुपपत्ति-
श्चाम्येन शेषं संस्थापयतीत्यत्र कर्मांतरत्वात्रापि प्रकृतमिन्नेत्युपपत्तेरिमाशयः। प्रयोजनं स्पष्टं। सूत्रार्थस्तु एकदे
शो द्रव्यं यस्य तत्स्विष्टकृदादि प्रयोजकं। उत्तत्राज्याद्यवदानस्यैव विधानेन प्रकृतेनावयविनासंयोगान्न द्रव्यमादिति
६ ॥ ॥अभिघारणे॥ ॥एकदेशद्रव्यत्वाद्रूपस्य प्रतिपत्तित्वस्याक्षिप्य समर्थनात्संगतिः। ऋतुपशवः सवनीयाश्चा
ग्नेयादयः। प्रजापशवः सप्तदश प्राजापत्यान्पशूनालभत इति विहिताः। ब्रह्मसाम्नि। माध्यंदिनसवनस्थब्रह्मसाम्नः

शा॰ दी॰ १

रव्यस्तोत्रकाले॰ व्यापृतत्वादिति॰ आद्यभागाद्दावितिरोषः॰ विपर्ययात्॰ उपयुक्तत्वस्तीयांत त्वाभ्यां हविर्विपरीत
त्वात्॰ अभ्यर्हितइति॰ अपूर्वोत्पादकत्वात्तद्विनाशका उपयुक्तसंस्कारादादरणीयइत्यर्थः॰ तथा॰ उपयोक्ष्यमाणत्
ति॰ विपरीतेति॰ प्राधान्यविपरीते ति॰ प्राधान्यविगुणत्वबोधकेत्यर्थः॰ न्यायतः॰ उपयोक्ष्यमाणत्वरूपन्यायात्॰ शब्द
तः॰ द्वितीयावशात्॰ विनियोगस्य विध्यधीनत्वाद्विधेश्चापेक्षितदृष्टफलपर्यवसायितया प्रयाजशेषप्रतिपत्त्यर्थत्वे
नाभिघारणविधायकत्वात्तद्वशेन विपरिणेक्षणतापाद्या त्वेयेतिसिद्धांतमाह॰ समयमिति॰ शेषस्येत्यनेन प्र
याजशेषेणेति प्रत्यक्षशेषपदस्यारस्याद्दपितद्यन्यतनीयाया॰ अन्यथा त्वौचित्यं ध्वनितं॰ दृष्टार्थेति॰ ज्ञकारितीक
रणरूपदृष्टफलकं॰ अन्यथा हि सशेषायांतस्यामास भागाथ्यायग्रहणोत्तविः संकीर्णं स्यादिति भावः॰ नचैवं
सति हविषामुपादेयत्वात्तद्गतबहुत्वं त्रित्वपर्यवसितं विवक्षितं स्यादत आह॰ हविरिति॰ नसंस्कारः॰ हविःसंस्कारः॰
यद्यप्ययमदृष्टरूपस्तथापि नियमादृष्टरूपत्वात्तदृष्टार्थतां विहन्तीत्यर्थः॰ एवंच हविषामुद्देश्यत्वात्तत्संख्या
विवक्षेति भावः॰ वस्तुतः॰ प्रधानार्थमुपात्तानामेवान्यत्रशेषत्वेनतदर्थमुपादेयत्वाभावात्संख्याविवक्षेति भाव
ः नचैवं प्राजापत्यवपासंस्कारार्थाभिघारणापत्तिः॰ तदपि घारणस्याप्रसक्ततया नियमाविषयत्वेन धारणाप्रसक्तेः॰
सुक्रुवाकवत्॰ सूक्तवाककरणाक प्रस्तरप्रहरणावत्॰ तयोर्यथा प्रक्षेपोद्देशाभ्यां हविर्देवतोभयसंस्कारत्वं तथा राम १

भिघारणाघारतानि प्रयाजाभ्याम् अत्र शेषहविः संस्कारत्वमित्यर्थः॰ अभिघारणो प्राज्ञाप्यस्य वपानां विप्रकर्षे
क्वाल विन्नं वा प्रयाज मे दुःस्यात् अनुयाजेष्वा स्यघारणार्थं पात्र वदिति सूत्रार्थः प्रणीतानं तु स्पष्टम्॥ ॥समानयनं॥
॥पूर्वेण प्रणीतकत्वापवादासंगतिः॰ आसेति॰ च तुर्थं क्षांग हृत्वाति॰ अष्टावुपभृतिगृह्णातीति विहितमित्यर्थः॰ प्र
कृतोपयुक्तं प्रदर्शं प्रकृतमुपाहरति॰ अतिहावेति॰ इत्रोपनतीति विहितं तती पप्रणीतेऽप्रतिनं स्व कृत्वेमर्थः॰ व
र्हिः॰ संतक प्रणीतोपक्रमे जुहूपात्रे उपभृत्यात्र संबंधि आसे समानयत इत्यर्थः॰ पूर्वपक्षको टेरपि निषेधस्य प्र
तियोगिसापेक्षत्वादन्ते कथनं॰ एवमग्रेऽपि॰ सर्वार्थमिति॰ उपभृति पत्प्रणीतार्थमासं तत्सर्वं प्रणीतार्थं नत्वंतिम
द्वयमात्रार्थमित्यर्थः॰ तत॰ प्रणीतार्थं चतुर्गृहीतं॰ इद्धानी॰ बर्हिः॰ प्रणीतोपक्रमेऽप्र द्वे॰ प्रणीतार्थमासं॰ बहुश्रुतेरि
ति व्याचष्टे॰ प्रणीतशब्दात्रेति॰ द्वद्वान्तेष्रूपमाणां प्रत्येकमभिसंबंध्यत इति न्यायादित्यर्थः॰ एतच्चोद्देश्यविशेषणा
स्यातंत्र्यादभ्युच्चयमानं ननुपजुह्वां गृह्णाति प्रणीतेभ्यस्तदिति तौ हवस्यापि प्रणीतार्थं त्वश्रवणात्कथमौप
भृतस्य सर्वप्रणीतार्थत्वमित्याशंक्याह॰ उपभृत्योरपीति॰ प्राप्तमेवेति॰ जुह्वा जुहोतीति होमे जुह्वविधानवशादित्यर्थः
॰ प्रणीतनं पूर्वपक्षे जौहवौपभृतयोः प्रणीतेषु विकल्पः॰ औपभृतपक्षे सर्वादौ तत्समानयनं॰ वर्हिरुपक्रमे औप
भृतस्य किंचित्क्षारणांपक्ष द्वयेपि॰ सिद्धांते तु जौहवेन प्रणीतत्वं कृत्वौपभृतार्थं नातिप प्रयाजद्वयं कार्यं न त्विक

त्वादिति · सूत्रार्थस्तु समानयनं मुख्यं प्रयोजकं स्यात् · चतुर्गृहीतान्याज्यानि भवन्तीति चतुर्गृहीतवद्रूपलिंगदर्श
नादिति · विकल्पे हि सति चतुर्गृहीतद्रूपमेव स्यात् समुच्चये तु नैव वयोपभृतं ध्रौवं चेति तत् समुपपद्यत इति ॥ ॥ त
त्रोपभृत्रिः ॥ समानयनस्य प्रयोजकत्वमुक्तमाक्षिप्य समाधीयत इति संगतिः · प्रतिपत्तिपूर्वपक्षमाघोतनं · ननु प्रत्य
क्षवचने सति कथं प्रकरणेन सर्वार्थत्वकल्पनेत्यत आह · पदिविति · पूर्वत्रास्वरसोद्भावनपूर्वकं पक्षान्तरमाह · नेति
इत्यर्थः · अनुपाजमाशार्थं · इतरत्र · औपभृतं · आम्नानामुभयत्रितन्त्र कार्ये अविभक्ता · अव्यवस्थिते इति सूत्रार्थः ·
प्रयोजनं स्पष्टम् ॥ ॥ तद्वत्संख्यं ॥ ॥ प्रासंगिकी संगतिः · सिद्धान्तमाह उच्यत इति · तेन · होमांगग्रहणागृहा
त्वेन · सा · अष्टसंख्याक्षतिः · तेन स्य नेन भिन्नविषयत्वमबाधे हेतुरुक्त इति भ्रमाच्छङ्कते · नन्विति · अंगगृहात्वस्य
तदौर्वल्ये तेनेमनेन हेतुत्वेनोक्तं न भिन्नविषयत्वमिति स्त्रचपन्नाह उच्यत इति · प्रयोजने प्रयातृद्वयार्थ अर्थन्यू
नसमानयनं अपृगृहीतस्य पंचस्वपि समस्याद्भ्रक्तितादिति न्यायेन विभागात् · सिद्धान्ते त्वर्थसमानयनमि
ति · सूत्रं स्पष्टं ॥ ॥ इति श्रीमत्सल्लक्षणमहामजवैद्यनाथोन्नीतायां शास्त्रदीपिकाप्रभायां चतुर्थस्य प्रथमः
पादः ॥ ॥ स्वरुस्त्व ॥ ॥ पूर्वपादे साक्षाद्यागसाधनविषया चिन्ता · इह तु व्यवहिततद्विषयेति विभागः · स्वरुः का राप
ष्ठशकलं · स्वरुभावना · स्वरुकार्यिकाभावना · लक्षणायेति · स्वादिरत्वादिधर्मलक्षणायेत्यर्थः · तथाच पूर्वपक्षमि ८

स्यप्रयधर्मसंबंधिनापि स्पर्ध्यः । तत्रयोग्यतावशात्कारशोतिकर्तव्यताविभागं दर्शयति । खदिरादीति । तथाते
नप्रकारेण । अन्यथासिद्धांतपक्षे वाक्यार्थविधाने । तन्मात्रविधाने । श्रौतः शाक्यार्थः पुरुषस्य चेति । उपक्रम
स्थस्य विधायकस्य चेत्यर्थः । न विधौ परशब्दार्थ इति न्यायात् । करोतेरनुवादकत्वं दर्शयति । ध्रुवेति । सूत्रार्थ
स्तु । खदिरत्वप्रयैकनिष्पत्तिकोनभवति । कुतः । स्वकर्मकक्रियाशब्दत्वादिति । प्रयोजनेखदिरनाशे पुनः खदि
रादिच्छेदनादिनातदुत्पादनं पूर्वपक्षे । सिद्धांतेनेति ॥ ॥ शाखायां ॥ ॥ प्रपशब्दवत्प्राचीशब्देपि नन्वक्षशोष्यति
देशेनाक्षेपासंगतिरितिरक्षचयत्राह । अक्रमेति । सिद्धांतमाह । आहर्त्तव्येति । हरतेर्द्विकर्मकत्वेपि प्रयोगकर्मणोऽवश्या
पेक्षितस्योक्तत्वाकांक्षयालवाक्योपात्तत्वमेवोचितं ननु वाक्यांतरस्थत्वमपि भाशयः । प्रतिशब्दयोगेस्यादपि वाक्यांतर
स्थेनाहर्त्तव्येनान्वयो नत्वसौ स्तीत्याह । अथेति । विहारदेशाद्या प्राचीदिक् तां प्रतीत्यर्थः । वाक्यांतरेण विशेषमात्र
समर्पणमिति दर्शयति । प्रकृतेति । प्राचीशब्दे । शाखायां स्यान्तस्य प्रधानत्वान्न स्यादेव आहर्त्तव्यत्वेनेप्सिततमत्वेन च
प्रधानत्वादिति सूत्रार्थः । प्रयोजनं स्पष्टं ॥ ॥ शाखायां ॥ ॥ प्राच्याः शाखायाः प्रयोगत्वेपि क्षिते केवलान्यप्रयोजनत्व
मुत मूलान्योन्यमपेक्षते ति तद्विशेषविचारासंगतिः । परिवासयेति । वा । मूलस्यापाति । मूलानादाने कुपरिवासनसं
स्कार्यत्वाच्छाखायाः इत्यर्थः । अन्यार्थेन । उक्तरीत्या शाखार्थेन । काप्रसत्वपादिति । तस्य धातुसंबंधाधिकारविहित

शा॰दी॰
९

त्वेन परिवासनस्योपवेषकरणसंबंधावगमादित्यर्थः शाखायाः परिवास्येति द्वितीयाश्रुत्या शाखाया अर्थं परिवासनस्यो
पवेषपूर्वकालतायाः संबंधमात्रेण कारकप्रत्ययोपपत्तेरित्याह वाक्येति वाक्यरूपात्संयोगाद्विनियोजकप्रमाणा
दित्यर्थः ननूपवेषकर्मकभावनायाः करणाकांक्षायां संनिहितस्य मूलस्यैव करणत्वेनान्वयादुपवेषार्थत्वमिति मू
लमित्याशंक्याह उपवेषमिति तथा च परार्थस्य करणत्वेनाश्रयणाच्चोपवेषकरणत्वं प्रयोजनत्वमित्यर्थः व
स्तुतः स्वरूपं करोतीति वदत्रार्थं इत्याह करोतिश्चेति वार्थश्चकारः इतीयासमर्थानि प्रत्ययोगीकारेणोपवेषा
र्थत्वमेव मूलस्य कुतो न स्यादित्याशंक्याप्याह करोतीति नेति शाखायां तत्र क्षिप्ते मूलत इति वाक्येन प्रधानत्वात त
च्छाखाप्रधानत्वात्परिवासनस्योपवेषेणाविभागः असंबंधः स्यात् कुतः दैवम्यात् श्रुतिवाक्यरूपप्रमाणान
लाबलादिति सूत्रार्थः प्रयोजनं पूर्वपक्षे उपवेषनाशे पुनः शाखाहरणं तथा पूर्णमास्यामपि तत् सिद्धांते नेति
॥ ॥ हरणे ॥ ॥ पूर्णमास्यामपि प्रस्तरप्रहरणार्थं शाखाहरणं चेति पूर्वाधिकरणप्रयोजनाक्षेपा संगतिः पूर्व
पक्षोपयोगितया वत्सापाकरणमिति सूत्रे नेति याग पाग नक्षक मंत्रवर्णिकः करणत्वाविनियुक्त सूक्तेना कूरूप
मंत्रवर्णिकल्प्यः स्थितमिति तृतीयाध्याय इत्यर्थः अर्थकर्म अदृष्टार्थप्रधानकर्म निर्वापवदेवेति पः काम
पेतान्तरोत्तरं वत्सीयानस्याप्यितिनस्या नयेपवमानाय निरुप्यपावकस्य शुचिम्याप्यन्तरेहविषानिर्वपेदिमादो

राम
९

क्लानिर्वापवदित्यर्थः सोऽयं चरुप्रियादिवाक्यगतस्तत्र न दृष्टान्तः तत्र यागस्य द्रव्यदेवतासंबंधात्मकत्वेन निर्वपतेरनु
वादमात्रत्वात् यागः यागोपलक्षणं। ननु सहशाखयेति वाक्ये यागनक्षत्रणाप्राप्तानाभावात्कथं शाखाप्रहरणस्या
र्थकर्मत्वमत आह शाखा चेति प्रस्तरप्रहरणानुवादेन शाखासाहित्यमात्रं विधीयते यथाविनतस्य च होमरूपस्यानुवा
दाद्यागलक्षणागमपत इत्यर्थः द्रव्यकर्मणि द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबंध इति वचआद्यन्यायादित्यर्थः हु
रतौ हरणे तत्र च हरणांशे च सा शाखा तथैव प्रतिपाद्येव सहशब्दस्वारस्यादपेक्षितत्वाद्द्वयरूपत्वाद्वेत्यर्थः न
नु षष्ठे च तृतीयपादे प्रविचारेणापोऽनरूपमत आह यथेति प्रतिपत्तित्वं तत्र समवेदे हरणमात्रसाहित्यं कथं न प्रस
गाद्युक्तमिति भावः सूत्रार्थस्तु हरणेऽनुमोतिर्होमः सहशब्दोक्तप्रस्तरयोगे साम्यादद्व्यर्णाचार्थक्रियारूपं प्रति
शेषत्वान्न प्रतिपत्तित्वमेनेति शेषः॥ ॥उभयसंयोगात्॥ ॥उभयत्रोपयेन संयुक्तमिममग्निं संस्तरो क्रिप्रतिपत्तिलक्ष
णाभावशंकाधिक्येनारंभासंगतिः प्रणीताः प्रणयनसंस्कृता आपः संयवने संप्रियश्रणां अंतर्वेदि वेदिम
ध्ये निनयति दिशेपति उभे संयवननिनयने कर्तृभूते प्रणीता आस्वीकुर्वाते साधनत्वेनेति शेषः वक्ष्यमाणा प्रति
पत्तिलक्षणोऽभयतां वित्कृपलक्षणां प्रयोजनसंयोगमात्रमेव विवक्षितमित्याह उभयत्रा विति प्रयोजनेनासंयुक्ता
नापयीमनयः प्रयोजनसंयवनोत्तरं प्रणीतानां यो निनयनार्थं पुनरुपादानं सिद्धानेनेति सूत्रार्थस्तु उभयत्रौ का

रा॰ दी॰ पविशेषेणासंप्रयोगाद्यप्रवर्तकत्वाद्वा प्रवर्तकत्वे प्रमाणेन नानेकत्राविनियोग इति ॥ ॥ प्रासनवत् ॥ ॥ दंडप्रदा
१॰ नमिति । दंडेन दीक्षयतीत्यनेनेत्यर्थः केचित्तु दंडधारणमिति पठन्ति तेन सम्यगेव दंडकरणकदीक्षासंस्का
रस्य धारणरूपत्वात् नियमनवद्गुणकर्मणः प्रतिपत्तिकत्वस्यापवादसंगतिसूचनापि सिद्धान्तकोटिः प्रयमनु
पन्यासः धारणेसति कृतार्थत्वादिति संबन्धः मैत्रावरुणः प्रेषानुवचनकर्ता ऋत्विक् अस्य दंडस्य अतः
प्रतिपाद्यत्वात् प्रशास्त्रे मैत्रावरुणस्य अपि प्रैति इति दिशतीत्यर्थः तथा च संप्रदानस्यापि सिद्धत्वात् दंडस्यानीप्सि
तकर्मतया द्वितीयेत्यर्थः तत्प्रधाने तदर्थमनुपयुक्तार्थतया प्रतिपत्त्यपेक्षित्वमुक्तं तत्राह इयमुक्तस्यापि
प्रदानार्थतामाशंक्य निराकरोतीति प्रशास्त्रे इति तेन दंडेन किं दृष्टं तदाह [illegible] इति प्रयोजनमाह नि
रूढेति पशुः प्रमयनं तथैस्ययनं दृप्ये विहितो निरूढपशुयागस्तत्रेत्यर्थः सूत्रे प्रासनवदिति कृष्णविषा
णाप्रासने दृष्टान्तः शेषं स्पष्टम् ॥ ॥ उक्तम् ॥ ॥ इह सर्वत्र प्रतिपत्तित्वमुक्तमाक्षिप्य प्रासमाधीयत इति संगति
कृष्णमृगस्य विषाणाशृंगं चात्वाले गर्तः नद्यस्यस्येति संस्कारस्य कार्यार्थत्वादिति भावः न केवलं प्रासनमेवोच्य
ते किं त्विज्यादिकं सर्वमित्याह इडेति इडाभक्ष इत्यर्थः कृतकरेति करणाकरभावे आदौ प्रकृतक्रियेत्यर्थः आकी
र्णवेद्यादिदेशं करोतीति तथा अतः प्रचारसौकर्याय देशस्य तदाकीर्णत्वमिति तत्रापि प्रतिपत्तित्वाकांक्षितानिर्मान्या राम १॰

देशेवेसमर्थः तद्वचनात् प्रतिपत्तिनियमविधिवचनात् प्रयोजनं अपूर्वं विपद्यते न स्यात् इत्युत्पत्तिविधौ पञ्चकं उप
नादिप्रयोजनेनसंयुक्ते कृत्स्नविधानादितदर्थमेवक्लृप्तस्यात्वतीयादिरूपयासंयोगाद्विनियोगात् तस्य वोपयो
तरगमनेसंबंधेशेषत्वादुपयुक्ताविशिष्टत्वात्प्रतिपत्तिः स्यादितिसूत्रार्थः ॥ ॥ सौमिके च ॥ इह प्रतिपत्तित्व
स्तरात्स्यातिव्याप्तिशंका प्रतिपत्तिसिद्धांतेननिरस्यत इति संगतिः अध्यायप्रसंगतिस्तु प्रासंगिकी पक्षद्वयेपि
परार्थसोमनिष्ठाप्रयोजकत्वात् वास्तोनेयवभृथो मन्त्रिवाक्यस्य सिद्धांतोपयोगितयोपन्यासः सोमेनन्नि
यंचमसादिपात्रे अवभृथ राद्धः कर्मपरो देशपरो वेति संशयो वन्मूलन्मित्याह किमितिः उमत्तिवाक्ये यत्रद
नीयत्वद्दोषोपनक्षतां ननु सोमलिप्तचमसादेर्नक्तादिवत्साधनतायां नैनद्दोषः कृपायव्रिरतत्प्राह पत्नीयमनेन वे
ति अस्यतमिति स्वपदस्य स्यपानस्य विधेयतयोद्देश्यतया वाविधिशब्दे देशानक्षणानुसोमलिप्तपदेसोमार्थ
ताधिष्ठाननक्षणापातेत्यात् तेने निततीयातु सहार्थ इति नतत्रापिनक्षणा दोषइत्याशयः नचप्रयाजशेषन्या
येनैवगतार्थता शंकनीया अवभृथकर्मणोभिघाररावत्तद्वयसंस्कारतायोग्यतयापातदोषस्यादितिः कौदृशी
प्रतिपत्तिस्तत्राहतानानीति यत्तद्देशादवभृथदेनयनस्याकांक्षावशेन दृष्टप्रक्षेपयप्रतिपत्तौपर्यवसानमितिभावः
सूत्रप्रयोजनेस्पष्टे ॥ ॥ कर्तृदेशकालानां ॥ ॥ देशप्रसंगाद्दन्यदपिदेशादिविचार्यत इति संगतिः कालाना

मिति बहुवचनस्यार्थपर्यंतपाद्व्यमपिति विषयइमाशयेनाह व्रीहिभिरिति॰ विधेरिति पंचमी परिसंख्या॰ अत्र॰
अप्राप्तविधिपरिसंख्याभ्यां॰ विधा॰ प्रकारः॰ त्रिधेति॰ उक्तसमदेशविधिहानेऽत्र उक्तनाविषमदेशनिवृत्तिक-
ल्पनं॰ प्राप्तविषमदेशबाधश्चेति दोषत्रयमवतीत्यर्थः॰ एतेन कर्मादिविधयः परिमिन्निति॰ एवं च समाख्ययोगव्य-
वच्छेदरूपनियमांशो विधिसाफल्यमिति भावः॰ नैषापि इति॰ नियमप्राप्त्यभावादित्यर्थः॰ नासमवेत॰ नापघेतेत्य-
र्थः॰ एवं च सति विधौ प्रधानप्रयुक्तत्वसिद्धिरित्यध्यायसंगतिर्बोध्या॰ सूत्रं स्पष्टम्॥ ॥तथा॥ ॥अनुबंध
॰प्रसंग॰ शंकतो पीति॰ षष्ठ्या अकारकविभक्तित्वात्कारकस्यैवं च क्रियान्वयात॰ श्चेतन्मिय स्यात्परं तत्पा॥ क्रि-
यान्वयप्रयुक्तं परिहरति॰ असमस्तपीति॰ द्रव्यद्वारेणेति॰ आरुण्यापदतद्रव्यपरिच्छेदकत्वेनेत्यर्थः॰ शंक्वानापि-
यत्र समाधिमाह॰ श्रुत्यैति॰ सूत्रेऽप्यस्यैव गुणस्य द्रव्यसंबंधानंतरं क्रियाप्रयुक्तिरित्यर्थः॥ ॥संस्कारे॥ ॥
विशेषाशंकामाह॰ व्रीहीनिति॰ प्रधानसाधनं॰ प्रधानापूर्वसाधनत्वं॥ ॥यजेतेति चोदना॥ ॥संगतिमाह पा-
गोगेति॰ एवं॰ अनुष्ठानप्रकारकथनपरत्वे अर्थवदिति॰ अनुष्ठानवाचित्वादित्यर्थः॰ अनतिप्रयोजनक-
त्वादित्याह पृच्छे वा इति॰ प्रदेशांतरे त्विति॰ प्रथमसूत्र इत्यर्थः॰ तस्य॰ द्रव्यदेवताक्रियस्य॰ तद्विनाभावात्॰ प्रमाण्या- राम
प्यत्वात्॰ इतरस्य॰ तदुक्तइमादिसूत्रस्य॰ कर्मणः॰ तदनुवादे॥ ॥विधेः॥ ॥दर्शस्य दीक्षणीये नावतस्यास्यानेक ११

